শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একনৱতিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে একনৱতিতমং দশকম্ ॥

## ভক্তিস্ৱরূপৱর্ণনম্

শ্রীকৃষ্ণ ৎৱৎপদোপাসনমভযতমং
    বদ্ধমিথ্যার্থদৃষ্টে -
র্মর্ত্যস্যার্তস্য মন্যে ৱ্যপসরতি ভযং
    যেন সর্ৱাত্মনৈৱ।
যত্তাৱৎ ৎৱৎপ্রণীতানিহ ভজনৱিধী -
    নাস্থিতো মোহমার্গে
ধাৱন্নপ্যাৱৃতাক্ষঃ স্খলতি ন কুহচি -
    দ্দেৱদেৱাখিলাত্মন্ ॥ **91.1** ॥

ভূমন্ কাযেন ৱাচা মুহুরপি মনসা
    ৎৱদ্বলপ্রেরিতাত্মা
যদ্যৎ কুর্ৱে সমস্তং তদিহ পরতরে
    ৎৱয্যসাৱর্পযামি।
জাত্যাপীহ শ্ৱপাকস্ত্ৱযি নিহিতমনঃ
    কর্মৱাগিন্দ্রিযার্থ -
প্রাণো ৱিশ্ৱং পুনীতে ন তু ৱিমুখমনা -
    স্ত্ৱৎপদাদ্বিপ্রৱর্যঃ ॥ **91.2** ॥

ভীতির্নাম দ্বিতীযাদ্ভৱতি ননু মনঃ
    কল্পিতং চ দ্বিতীযং
তেনৈক্যাভ্যাসশীলো হৃদযমিহ যথা -
    শক্তি বুদ্ধ্যা নিরুন্ধ্যাম্।

মাযাৱিদ্ধে তু তস্মিন্ পুনরপি ন তথা
    ভাতি মাযাধিনাথং
তং ৎৱাং ভক্ত্যা মহত্যা সততমনুভজ -
    ন্নীশ ভীতিং ৱিজহ্যাম্॥ **91.3** ॥

ভক্তেরুৎপত্তিৱৃদ্ধী তৱ চরণজুষাং
    সঙ্গমেনৈৱ পুংসা -
মাসাদ্যে পুণ্যভাজাং শ্রিয ইৱ জগতি
    শ্রীমতাং সঙ্গমেন।
তৎসঙ্গো দেৱ ভূযান্মম খলু সততং
    তন্মুখাদুন্মিষদ্ভি -
স্ত্বন্মাহাত্ম্যপ্রকারৈর্ভৱতি চ সুদৃঢা
    ভক্তিরুদ্ধূতপাপা॥ **91.4** ॥

শ্রেযোমার্গেষু ভক্তাৱধিকবহুমতি -
    র্জন্মকর্মাণি ভূযো
গাযন্ ক্ষেমাণি নামান্যপি তদুভযতঃ
    প্রদ্রুতং প্রদ্রুতাত্মা।
উদ্যদ্ধাসঃ কদাচিৎ কুহচিদপি রুদন্
    ক্বাপি গর্জন্ প্রগায -
ন্নুন্মাদীৱ প্রনৃত্যন্নযি কুরু করুণাং
    লোকবাহ্যশ্চরেযম্॥ **91.5** ॥

ভূতান্যেতানি ভূতাত্মকমপি সকলং
    পক্ষিমৎস্যান্ মৃগাদীন্
মর্ত্যান্ মিত্রাণি শত্রূনপি যমিতমতি -
    স্ত্বন্মযান্যানমানি।
ৎৱৎসেৱাযাং হি সিধ্যেন্মম তৱ কৃপযা

ভক্তিদার্ঢ্যং ৱিরাগ -
স্ত্বত্তত্ত্বস্যাৱবোধোঽপি চ ভুৱনপতে
যত্নভেদং ৱিনৈৱ॥ **91.6**॥

নো মুহ্যন্ ক্ষুত্তৃডাদ্যৈর্ভৱসরণিভৱৈ -
স্ত্বন্নিলীনাশযৎৱা -
চ্চিন্তাসাতত্যশালী নিমিষলৱমপি
ৎৱৎপদাদপ্রকম্পঃ।
ইষ্টানিষ্টেষু তুষ্টিৱ্যসনৱিরহিতো
মাযিকৎৱাৱবোধা -
জ্জ্যোৎস্নাভিস্ত্বন্নখেন্দোরধিকশিশিরিতে -
নাত্মনা সঞ্চরেযম্॥ **91.7**॥

ভূতেষ্ৱেষু ৎৱদৈক্যস্মৃতিসমধিগতৌ
নাধিকারোঽধুনা চে -
ত্ত্বৎপ্রেম ৎৱৎকমৈত্রী জডমতিষু কৃপা
দ্বিটসু ভূযাদুপেক্ষা।
অর্চাযাং ৱা সমর্চাকুতুকমুরুতর -
শ্রদ্ধযা ৱর্ধতাং মে
ৎৱৎসংসেৱী তথাপি দ্রুতমুপলভতে
ভক্তলোকোত্তমৎৱম্॥ **91.8**॥

আৱৃত্য ৎৱৎস্বরূপং ক্ষিতিজলমরুদা -
দ্যাত্মনা ৱিক্ষিপন্তী
জীৱান্ ভূযিষ্ঠকর্মাৱলিৱিৱশগতীন্
দুঃখজালে ক্ষিপন্তী।
ৎৱন্মাযা মাভিভূন্মামযি ভুৱনপতে
কল্পতে তৎপ্রশান্ত্যৈ

ৎৱৎপাদে ভক্তিরেৱেত্যৱদদযি ৱিভো
    সিদ্ধযোগী প্রবুদ্ধঃ ॥ **91.9** ॥

দুঃখান্যালোক্য জন্তুষ্ৱলমুদিতৱিৱে -
    কোঽহমাচার্যৱর্যা -
ল্লব্ধ্ৱা ৎৱদ্রূপতত্ত্বং গুণচরিতকথা -
    দ্যুদ্ভৱদ্ভক্তিভূমা।
মাযামেনাং তরিৎৱা পরমসুখমযে
    ৎৱৎপদে মোদিতাহে
তস্যাযং পূর্ৱরঙ্গঃ পৱনপুরপতে
    নাশযাশেষরোগান্ ॥ **91.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একনৱতিতমং দশকং সমাপ্তম্ ॥